नं. ५०६१

वेदाङ्ग चतुष्टयम्

(शिक्षा. ज्योतिष. छन्द. निघण्टव:)

× × × ×

पत्र. २८ ———— सं.

वेदांगानि.

वेदाङ्गचतुष्टयम्

(शिक्षाज्योतिषछन्दोनिरुक्तात्मकः)

५०६१

॥अथशिक्षाचतुष्टयप्रारंभः॥ श्लो ४००

॥ हरिः ॐ ॥

शिक्षा. श्रीगणेशाय नमः॥ ॥ अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा॥ शास्त्रानु
पूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः॥ [illegible]
१ प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः॥ पुनर्व्यक्तीकरिष्यामि वाच उच्चार
णे विधिं॥ त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः॥ प्राकृते संस्कृते चापि स्व
यं प्रोक्ताः स्वयंभुवा॥ स्वरा विंशतिरेकश्च स्पर्शानां पंचविंशतिः॥ यादयश्च
स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥ अनुस्वारो विसर्गश्च ≍क ≍पौ चा
पि पराश्रितौ॥ दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च॥ १॥ आत्मा बु १
द्ध्या समेत्यार्थान्मनो युंक्ते विवक्षया॥ मनः कायाग्निमाहंति स प्रे
रयति मारुतं॥ मारुतस्तूरसि चरन्मंद्रं जनयति स्वरं॥ प्रातः सवनयो

गतं छंदोगायत्रमाश्रितं।। कंठेमाध्यंदिनयुगंमध्यमंत्रैष्टुभानुगं।। तारंतार्ती
यसवनंशीर्षण्यंजागतानुगं।। सोदीर्णोमूर्ध्न्यभिहतोवक्त्रमापद्यमा
रुतः।। वर्णाञ्जनयतेतेषांविभागःपंचधास्मृतः।। स्वरतःकालतःस्थानात्प्र
यत्नानुप्रदानतः।। इतिवर्णविदःप्राहुर्निपुणंतंनिबोधत।।२।। उदात्तश्चानु
दात्तश्चस्वरितश्चस्वरास्त्रयः।। ह्रस्वोदीर्घःप्लुतइतिकालतोनियमाअचि।।
उदात्तेनिषादगांधारावनुदात्तऋषभधैवतौ।। स्वरितप्रभवाह्येतेषड्ज
मध्यमपंचमाः।। अष्टौस्थानानिवर्णानामुरःकंठःशिरस्तथा।। जि
ह्वामूलंचदंताश्चनासिकोष्ठौचतालुच।। ओभावश्चविवृत्तिश्चश
षसारेफएवच।। जिह्वामूलमुपध्माचगतिरष्टविधोष्मणः।। यद्योभा

वर्गसंधानमुकारादिपरंपदं ।। स्वरांतंतादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ।। ३ ।।
हकारं पंचमैर्युक्तमंतस्थाभिश्च संयुतं ।। औरस्यं तं विजानीयात्कंठ्यमा
माहुरसंयुतं ।। कंठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।। स्युर्मू
र्धन्या ऋटुरषा दंत्या ऌतुलसाः स्मृताः ।। जिह्वामूले तु कुः प्रोक्तो दं
त्योष्ठ्यो वः स्मृतो बुधैः ।। एऐ तु कंठतालव्या ओ औ कंठोष्ठजौ स्मृतौ ।।
अर्धमात्रा तु कंठ्या स्यादेकारैकारयोर्भवेत् ।। ओकारौकारयोर्मा
त्रा तयोर्विवृतसंवृतं ।। संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकं ।। घोषा वा
संवृताः सर्वे अघोषा विवृताः स्मृताः ।। ४ ।। स्वराणामूष्मणां चैव विवृ
तं करणं स्मृतं ।। तेभ्योपि विवृतावेङौ ताभ्यामैचौ तथैव च ।। अनुस्वा

रयमाणांच नासिकास्थानमुच्यते॥ अयोगवाहाविज्ञेयाआश्रयःस्थान
भागिनः॥ अलाबुवीणानिर्घोषोदंत्यमूल्यःस्वराननु॥ अनुस्वारस्तुकर्त्त
व्योनित्यंह्रोःशषसेषुच॥ अनुस्वारेविवृत्त्यांतुविरामेचाक्षरद्वये॥ द्विरोष्ठ्यौ
तुविगृह्णीयाद्यत्रौकारवकारयोः॥ व्याघ्रीयथाहरेत्पुत्रान्दंष्ट्राभ्यांनच
पीडयेत्॥ भीतापतनभेदाभ्यांतद्वद्वर्णान्प्रयोजयेत्॥ ५॥ यथासौराष्ट्रि
कानारीतक्रँइत्यभिभाषते॥ एवंरंगाःप्रयोक्तव्याःखेअराँइवखेदया॥
रंगवर्णंप्रयुंजीरन्नोग्रसेत्पूर्वमक्षरं॥ दीर्घस्वरंप्रयुंजीयात्पश्चान्नासि
क्यमाचरेत्॥ हृदयेचैकमात्रस्त्वर्धमात्रस्तुमूर्धनि॥ नासि
कायांतथार्धंचरंगस्यैवंद्विमात्रता॥ हृदयादुत्करेतिष्ठन्कांस्येनस

मनुस्वरन्॥ मार्दवंचद्विमात्रंच जघन्वाँ इतिनिदर्शनं॥ मध्येतुकंपयेत्कंपमु
भौपार्श्वौसमोभवेत्॥ सरंगंकंपयेत्कंपंरथीवेतिनिदर्शनं॥ एवंवर्णाः प्र
योक्तव्यानाव्यक्तानचपीडिताः॥ सम्यग्वर्णप्रयोगेणब्रह्मलोकेमहीयते॥
॥६॥गीतीशीघ्रीशिरःकंपीतथालिखितपाठकः॥ अनर्थज्ञोल्पकंठश्चषडेतेपा
ठकाधमाः॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तुसुस्वरः॥ धैर्यंलयसमर्थंचष
डेतेपाठकागुणाः॥ शंकितंभीतमुद्घुष्टमव्यक्तमनुनासिकं॥ काकस्वरंशि
रसिगतंतथास्थानविवर्जितं॥ उपांशुदष्टंत्वरितंनिरस्तंविलंबितंगद्गदि
तंप्रगीतं॥ निष्पीडितंग्रस्तपदाक्षरंचवदेन्नदीनंनतुसानुनास्यं॥ प्रातः
पठेन्नित्यमुरस्थितेनस्वरेणशार्दूलरुतोपमेन॥ मध्यंदिनेकंठगतेन

चैवंचक्रौंकसंकूजितसंनिभेन॥ तारंतुविद्यात्सवनंतृतीयंशिरोगतंतच्चस
दाप्रयोज्यं॥ मयूरहंसान्यभृतस्वराणांतुल्येननादेनशिरःस्थितेन॥ ७ ॥ अ
चोऽस्पृष्टायणस्त्वीषन्नेमिःस्पृष्टाः शरःस्मृताः॥ शेषाःस्पृष्टाहलःप्रोक्तानि
बोधानुप्रदानतः॥ यमोनुनासिकानह्रौनादिनोहझषस्मृतः॥ ईषन्नादाय
णोजश्चश्वासिनस्तुखफादयः॥ ईषच्छ्वासांश्चरोविद्याद्गोर्धामैतत्प्रचक्षते॥
दाक्षीपुत्रःपाणिनिनायेनेदंव्यापितंभुवि॥ छंदःपादौतुवेदस्यहस्तौकल्पो
थपठ्यते॥ ज्योतिषामयनंचक्षुर्निरुक्तंश्रोत्रमुच्यते॥ शिक्षाघ्राणंतुवेद
स्यमुखंव्याकरणंस्मृतं॥ तस्मात्सांगमधीत्यैवब्रह्मलोकेमहीयते॥ ८ ॥ उदा
त्तमाख्यातिवृषोंगुलीनांप्रदेशिनीमूलनिविष्टमूर्धा॥ उपां

तमध्ये स्वरितं ध्यतं च कनिष्ठिकायामनुदात्तमेव॥ उदात्तं प्रदेशिनीं विद्यात्प्र
चयं मध्यतोंगुलिं॥ निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकां॥ अंतोदात्तमा
द्युदात्तमुदात्तमनुदात्तं नीचस्वरितं॥ मध्योदात्तं स्वरितं द्युदात्तं त्र्युदात्तमिति न
वपदशय्या॥ अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतिरिंद्राबृहस्पती॥ अग्निरि
त्यंतोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितं॥ हविषां मध्यो
दात्तं स्वरिति स्वरितं॥ बृहस्पतिरिति द्युदात्तमिंद्राबृहस्पती इति त्र्युदात्तं॥ अनुदात्तो
हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः॥ स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः॥ ४
॥२॥ चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः॥ शिखी रौति त्रिमात्रं तु नकुल
स्त्वर्धमात्रकं॥ कुतीर्थादागतं दग्धमपवर्णं च भक्षितं॥ न तस्य पाठे मोक्षो

स्तिपापाहेरिवकिल्बिषात्॥ सुतीर्थादागतंव्यक्तंस्वाम्नाय्यंसुव्यवस्थितं॥ सुस्व
रेणसुवक्त्रेणप्रयुक्तंब्रह्मराजते॥ मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तो
नतमर्थमाह॥ सवाग्वज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधात्॥ अ
नक्षरंहतायुष्यंविस्वरंव्याधिपीडितं॥ अक्षताशस्त्ररूपेणवज्रंपततिमस्त
के॥ हस्तहीनंतुयोधीतेस्वरवर्णविवर्जितं॥ ऋग्यजुःसामभिर्दग्धोवियोनि
मधिगच्छति॥ हस्तेनवेदंयोधीतेस्वरवर्णार्थसंयुतं॥ ऋग्यजुःसामभिःपू
तोब्रह्मलोकेमहीयते॥१०॥ शंकरःशांकरींप्रादाद्दाक्षीपुत्रायधीमते॥ वा
ङ्मयेभ्यःसमाहृत्यदेवींवाचमितिस्थितिः॥ येनाक्षरसमाम्नायमधि
गम्यमहेश्वरात्॥ कृत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः॥ येनधौ
तागिरःपुंसांविमलैःशब्दवारिभिः॥ तमश्चाज्ञानजंभिन्नंतस्मै०॥ अज्ञा

ज्यो. ५ नांधस्यलोकस्य ज्ञानांजनशलाकया॥ चक्षुरुन्मीलितंयेनतस्मै०॥ त्रिनयनमभिमुखनिःसृतामिमांयइहपठेत्प्रयतश्चसदाद्विजः॥ सभवतिधनधान्यपशुपुत्रकीर्त्तिमानतुलंचसुखंसमश्नुतेदिवीतिदिवीति॥ ११॥ अथशिक्षामात्मोदात्तश्चहकारंस्वराणांयथागीत्यचोस्पष्टोदात्तंचाषस्तुशंकरएकादश॥ ॥ इति वेदनासिकशिक्षासमाप्ता॥ ॥ हरिःॐ ३॥ पंचसंवत्सरमयंयुगाध्यक्षंप्रजापतिं॥ दिनर्त्वयनमासांगंप्रणाम्यशिरसाशुचिः॥ प्रणम्यशिरसाकालमभिवाद्यसरस्वतीं॥ कालज्ञानंप्रवक्ष्यामिलगधस्यमहात्मनः॥ ज्योतिषामयनंकृत्स्नंप्रवक्ष्याम्यनुपूर्वशः॥ विप्राणांसंमतंलोकेयज्ञकालार्थसिद्धये॥ निरेकंद्वादशार्धाब्दंद्विगुणंगतसंज्ञिकं॥ षष्ट्याषष्ट्यायुतंद्वाभ्यांपर्वणांराशिरुच्यते॥ ५
स्वराक्रमेकेसोमार्कौयदासाकंसवासवौ॥ स्यात्तदादियुगंमाघस्तपःशुक्लो

दिनं त्यजः॥ १॥ अपद्येते श्रविष्ठादौ सूर्याचांद्रमसावुदक्॥ सार्पार्द्धे दक्षिणार्कस्तु
माघश्रावणयोः सदा॥ घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ॥ दक्षिणे तौ वि
पर्यस्तौ षण्मुहूर्त्यय़नेन तु॥ द्विगुणं सप्तमं चाहुरयनाद्यं त्रयोदश॥ चतुर्थं दशमं
चैव द्वियुग्माद्यं बहुलेप्यृतौ॥ वसुस्त्वष्टा भगोजश्चमित्रः सर्पाश्विनौ जलं॥ धा
ताकश्चायनाद्याश्चार्धपंचनभस्त्वृतुः॥ भांशास्युरष्टकाः कार्याः पक्षाद्वादश
चोद्धताः॥ एकादशगुणस्योनः शुक्लेर्धंचेंद्रवायदि॥ २॥ कार्याभांशाष्टकास्थाने
नेकलाएकान्नविंशतिः॥ ऊनस्थाने द्विसप्तती रुद्धपेह्नसंमिताः॥ त्र्य
हंशी भशेषो दिवसांश भागश्चतुर्दशस्याप्युपनीतभिन्नं॥ भार्धेधि
के चाधिगतेपरेंशौ द्वावुत्तमैकं नवकेरवेद्यं॥ पक्षात्पंचदशाच्चाधंतद्भु

ज्यो॰
६

ऋमिति निर्दिशेत्॥ नवभिस्तु कृतांशास्याद्दिनांशाद्यधिके नतु॥ ओद्वाघः स्वे श्वे
ही रोषाचिन्मषण्य: सोमाधानः॥ रेम्नध्राश्वाश्वोजस्त्व श्वोह्येंछाइत्यक्षा
लिंगैः॥ जाबाघंशे: समंविद्यात्सर्वार्धेपा वस्त्वन्तरे॥ भाद्दानांशाच्चतुर्दशी
काष्ठानांदेविनाकला:॥२॥ कलाद्दशाच विंशास्याद्धि मुहूर्तस्तुनाडिके॥ द्वि
त्रिंशास्त्वत्कलानांतु षट्शाती स्याधिकंभवेत्॥ नाडिके द्वे मुहूर्तस्तु पंचाश
त्पलमाषकं॥ माषका स्तुंभको द्रोणः कुटपैर्वर्धते त्रिभिः॥ सप्तसप्तकं भयु
क्तस्योनः सूर्याद्यो नित्रयोदश॥ नवमानिचपंचाङ्गः काष्ठाः पंचाक्षराः स्म
ताः॥ द्वैविष्ठाभ्यां गुणाभ्यस्ता न्याग्वि लग्नान्वि निर्दिशेत्॥ सूर्यान्मा ६
सान्षब्ळ भ्यस्ता न्विद्याचांद्रमसान्त तून्॥ अतीतपर्वभागेषुशोधये

द्विगुणांतिथिं॥ तेषुमंडलभागेषु तिथिनिष्ठांगतोरविः॥ ४॥ याः पर्वभादा
नकलास्तासु सप्तगुणांतिथिं॥ प्रक्षिपेत्कलासमूहस्तु विद्यादादानकीः
कलाः॥ यदुत्तरस्यायनतोयनंस्याच्छेषंतुयद्दक्षिणतोयनस्य॥ तदेवषष्ट्या
द्विगुणंविभक्तंसद्वादशंस्याद्दिवसप्रमाणं॥ तदर्धंदिनभागानांसदापर्वणिप
र्वणि॥ ऋतुशेषंतुतद्विद्यात्संख्यायसहपर्वणां॥ इत्युपायसमुद्देशोभूयोप्ये
नंप्रकल्पयेत्॥ ज्ञेयराशिगताभ्यस्तान्विभजेज्ज्ञानराशिषु॥ अग्निः प्रजा
पतिः सोमोरुद्रोदितिर्बृहस्पतिः॥ सर्पाश्चपितरश्चैवभगश्चैवार्यमापिच॥ ५॥
सवितात्वष्टाथवायुश्चेन्द्राग्नीमित्रएवच॥ इन्द्रोनिर्ऋतिरापोवैविश्वेदेवा
स्तथैवच॥ विष्णुर्वसवोवरुणोजएकपात्तथैवच॥ अहिर्बुध्न्यस्तथापूषा

श्विनोयमएवच॥ नक्षत्रदेवताएताएताभिर्यज्ञकर्मणि॥ यजमानस्यशास्त्र
ज्ञैर्नामनक्षत्रजंस्मृतं॥ इत्येतन्मासवर्षाणां मुहूर्त्तोदयपर्वणां॥ दिनर्त्वय
नमासांगं व्याख्यातं लगधोब्रवीत्॥ सोमसूर्यस्त्रिचरितो लोकान्लोके च सं
मितं॥ सोमसूर्यस्त्रिचरितो विद्वान्वेदविदश्नुते॥ ६॥ विषुवंतद्गुणं द्वाभ्यां रूप
हीनं तु षड्गुणं॥ यल्लब्धं तानि पर्वाणि तथोर्ध्वं सा तिथिर्भवेत्॥ माघशुक्लप्रवृ
त्तेस्तु पौषकृष्णसमापिनः॥ युगस्य पंचवर्षाणि कालज्ञानं प्रचक्षते॥ तृती
यां नवमीं चैव पौर्णमासीं त्रयोदशीं॥ षष्ठीं च विषुवं प्रोक्तो द्वादश्यां च समं भ
वेत्॥ चतुर्दशीमुपवसथस्तथा भवे द्युथोदितो दिनमुपैति चंद्रमाः॥ माघशु
क्लाह्निको युंक्ते श्रविष्ठायां च वार्षिकीं॥ यथा शिखा मयूराणां नागानां मण

योयथा॥ तद्वद्वेदांगशास्त्राणां ज्योतिषं मूर्धनि स्थितं॥ वेदाहि यज्ञार्थम
भिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः॥ तस्मादिदं कालविधानशा
स्त्रं यो ज्योतिषं वेद स वेद यज्ञान्यो ज्योति
षं वेद स वेद यज्ञानिति॥ ७॥ ॥ पंचसंवत्सरमयपद्येते कार्याः कलादशाचयाः
पर्वसविताविषुवंसप्त॥ ॥ इति ज्योतिषं समाप्तं॥ ॥ हरिः ॐ ३॥ ॥ ॥
मयरसतजभनलगसंमितं भ्रमति वाङ्मयं जगति यस्य॥ स जयति
पिंगलनागः शिवप्रसादाद्विशुद्धमतिः॥ त्रिगुरुं विद्धि मकारं लघ्वा
दिसमन्वितं यकाराख्यं॥ लघुमध्यमं तु रेफं सकारमंते गुरू नि
बद्धं॥ लघ्वंत्यं हि तकारं जकारमुभयोर्लघुं विजानीयात्॥ आदि

छंद
८

गुरुं च भकारं नकारमिह पैंगले त्रिलघुं ॥ दीर्घसंयोगपरं तथा व्यं
जनांतमक्षरांतं ॥ सानुस्वारं च गुरुं क्वचिदवसाने पि लघ्वं त्यं ॥ आदि
मध्यावसानेषु यरता यांति लाघवं ॥ भजसा गौरवं यांति मनौ तु गुरु
लाघवं ॥ त्रिविरामं दशवर्णं बणमात्रमुवाच पिंगलः सूत्रं ॥ छंदोवर्ग
पदार्थप्रत्ययहेतोश्च शास्त्रादो ॥ १ ॥ धी श्री स्त्री म् ॥ वरा साय् ॥ का
गुहार् ॥ वसुधास् ॥ सा ते क्व त् ॥ कदा सज् ॥ किं वद भ् ॥ न हसन् ॥ ग ल् ॥
गंते ॥ धात्रादिपरः ॥ हे ॥ लो सः ॥ ग्लो ॥ अष्टौ वसवइति ॥ २ ॥ छंदः ॥ गायत्री ॥
दैव्येकं ॥ आसुरी पंचदश ॥ प्राजापत्याष्टौ ॥ यजुषां षट् ॥ साम्नां द्विः ॥
ऋचां त्रिः ॥ द्वौ द्वौ साम्नां वर्धेत ॥ त्री स्त्रीन् ऋचां ॥ चतुरश्चतुरः प्राजा

श्रुतं
८

पत्यायाः॥ एकैकं शेषे॥ जत्यादासुरी॥ तान्युष्णिगनुष्टुब्बृहतीपंक्ति
त्रिष्टुब्जगत्यः॥ तिस्रस्तिस्रः सनाम्न्य एकैकाब्राह्म्यः॥ प्राग्यजुषा
मार्षद्दूति॥३॥ पादः। इयादिपूरणः॥ गायत्र्यावसवः॥ जगत्या आदि
त्याः॥ विराजोदिशः॥ त्रिष्टुभो रुद्राः॥ एकद्वित्रिचतुष्पादुक्तपादं॥ आ
द्यं चतुष्पादृतुभिः॥ क्वचित्त्रिपादृषिभिः॥ सापादनिचृत्॥ षट्क
सप्तकयोर्मध्येऽष्टावतिपादनिचृत्॥ द्वौ नवकौ षट्कश्च नागी॥
विपरीता वाराही॥ षट्कसप्तकाष्टकैर्वर्धमाना॥ विपरीता प्रतिष्ठा॥ तृ
तीयं द्विपाज्जागतगायत्राभ्यां॥ त्रिपात्त्रैष्टुभैः॥ उष्णिग्गायत्रो जा
गतश्च॥ ककुम्मध्ये चेदंत्यः॥ पुर उष्णिक्पुरः॥४॥ परोष्णिक्परः॥

छंद

चतुष्पाद् ऋषिभिः॥ अनुष्टुब्गायत्रैः॥ त्रिपात्क्वचिज्जागताभ्यांच॥

१ मध्येऽन्येच॥ बृहती जागतस्त्रयश्च गायत्राः॥ पथ्यापूर्वश्चेत्तृतीयः॥

न्यंकुसारिणी द्वितीयः॥ स्कंधोग्रीवी क्रौष्टुकेः॥ उरो बृहती यास्कस्य॥

उपरिष्टाद्बृहत्यंते॥ पुरस्ताद्बृहती पुरः॥ क्वचिन्नवकाश्चत्वारः॥ वैराजौ

गायत्रौच॥ त्रिभिर्जागतैर्महा बृहती॥ सतो बृहती तांडिनः॥ पंक्तिर्जा

गतौगायत्रौच॥ पूर्वौचेद्युजौ सतः पंक्तिः॥ विपरीतौच॥ आस्ता

रपंक्तिः परतः॥ ५॥ प्रस्तारपंक्तिः पुरतः॥ विष्टारपंक्तिरंततः॥ संस्ता

रपंक्ति र्बहिः॥ अक्षरपंक्तिः पंचकाश्चत्वारः॥ द्वावप्यल्पशः॥ पद

पंक्तिः पंच॥ चतुष्कषट्कौत्रयश्च॥ पथ्या पंचभिर्गायत्रैः॥ जग १

ती षङ्क्तिः ॥ एकेन त्रिष्टुब्ज्योतिष्मती ॥ तथा जगती ॥ पुरस्ताज्ज्योतिः प्र
थमेन ॥ मध्येज्योतिर्मध्यमेन ॥ उपरिष्टाज्ज्योतिरंत्येन ॥ एकस्मिन्पंच
के छंदः शं कुमती ॥ षट्के ककुद्मती ॥ त्रिपाद निष्ठ मध्या पिपीलिक म
ध्या ॥ विपरीतायवमध्या ॥ ऊनाधिकेनैकेन निचृद्भुरिजौ ॥ द्वाभ्यां वि
राट् स्वराजौ ॥ आदितः संदिग्धे ॥ द्वा देवतादितश्च ॥ अग्निः सविता
सोमो बृहस्पतिर्मित्रावरुणाविंद्रो विश्वेदेवादेवताः ॥ स्वराः षड्ज ऋष
भगांधारमध्यमपंचमधैवतनिषादाः ॥ सित सारंग पिशंगक्ष्ण नी
ल लोहित गोरावर्णाः ॥ आग्निवेश्यकाश्यपगौतमांगिरसभार्ग
व कौशिक वासिष्ठानि गोत्राणि ॥ श्यामान्यति छंदांसि ॥ रोचनाभाः

छंद

१०

10

कृतयः ॥ अनुक्तानांकामतोवर्णा इति ॥ ७ ॥ चतुःशतमुत्कृतिः ॥ च
तुरश्चतुरस्त्यजेदुत्कृतेः ॥ तान्यभिसंव्याप्रेभ्यः कृतिः ॥ प्रकृत्याचोप
सर्गवर्जितैः ॥ धत्यष्टिशक्करीजगत्यः ॥ पृथक्पृथक्पूर्वतएतान्येवै
षां ॥ द्वितीयंद्वितीयमतितः ॥ अथलौकिकं ॥ आत्रैष्टुभाच्चयदार्षं ॥
पादश्चतुर्भागः ॥ यथावृत्तसमाप्तिर्वा ॥ लः समुद्रागणाः ॥ गोगंतमध्या
दिर्न्लश्च ॥ स्वरार्धंचार्यार्धं ॥ अत्रायुङ्नज् ॥ षष्ठोज् ॥ न्लौवा ॥ न्लौ
चेत्पदंद्वितीयादि ॥ सप्तमः प्रथमादि ॥ अंत्येपंचमः ॥ ८ ॥ षष्ठश्चल् ॥ १०
त्रिषुगणेषुपादः पथ्याद्येच ॥ विपुलान्या ॥ चपलाद्वितीयचतु
र्थौग्मध्येजौ ॥ पूर्वेमुखपूर्वा ॥ जघनपूर्वेतरत्र ॥ उभयोर्महाच

पला॥ आर्धसमा गीतिः॥ अन्येनोपगीतिः॥ उत्क्रमेणोद्गीतिः॥
अर्धे वसुगण आर्यागीतिः॥ वैतालीयं द्विः स्वरा अयुक्पादे युग्वसवो
ते र्ल्गाः॥ गौपछंदसिकं॥ आपातालिका भ्गौ ग्॥ शेषे परेणयुङ् नसा
कं॥ षट्चा मिश्रायुजि॥ पंचमेन पूर्वः साकं प्राच्यवृत्तिः॥ अयुक्तृती
येनोदीच्यवृत्तिः॥ आभ्यां युगपत्प्रवृत्तकं॥ अयुक्चारुहासिनी॥ २॥
युगपरांतिका॥ गंताद्विर्वसवो मात्रासमकल्नवमः॥ द्वादशश्च वान
वासिका॥ विश्लोकः पंचमाष्टमौ॥ चित्रा नवमश्च॥ परयुक्तेनोपचित्रा॥
एभिः पादाकुलकं॥ गीत्यार्या लः॥ शिखा विपर्यस्ताद्धा॥ लः पूर्वश्चे
ज्ज्योतिः॥ गश्चेत्सौम्या॥ चूलिकैकान्नत्रिंशदेकत्रिंशदंते ग्॥ सा

छंद ग्येननसमा लांगलइति॥ १०॥ वृत्तं॥ सममर्धसमं विषमंच॥ समंतावत्कृ
११ त्वः कृतमर्धसमं विषमंच॥ राश्यूनं॥ ग्लिति समानी॥ ल्गिति प्रमाणी॥
वितानमन्यत्॥ पादस्यानुष्टुब्वक्त्रं॥ नप्रथमात्स्नो॥ द्वितीयचतुर्थ
योरश्च॥ वान्यत्॥ यच्चतुर्थात्॥ पथ्यायुजोज्॥ विपरीतैकीयं॥ चप
लायुजोन्॥ विपुलायुग्लः सप्तमः॥ सर्वतः सैतवस्य॥ भ्नौ न्तोच॥
प्रतिपादं चतुर्वृद्ध्यापरचतुरूर्ध्वं॥ गावंतश्चापीडः॥ ११॥ गावादौचे
त्प्रत्यापीडः॥ प्रत्यापीडोगावादौच॥ प्रथमस्यविपर्यासेमंज ११
रीलवल्यमृतधाराः॥ उक्तामेकत स्जौ स्लौ न्सौज्गौ भ्नौज्लौगू
स्जौस्जौगू॥ ततीयस्य सौरभकं नौ भ्गौ॥ ललितं नौसौ॥ उपस्थि

तप्रचुपितं पथ्य गाद्य म्सौ ज्भौ गो स्नौ ज्रौ ग्नौ स्नौ न्जौ यू॥ वर्धमानं तती
ये नौ स्नौ न्सौ॥ शुद्ध विराडृषभं त्ज्राः॥ अर्धे॥ उपचित्रकं सौ स्लौ ग्भौ
भ्भौ गः॥ द्रुतमध्या भौ भ्भौ ग्न्जौ ज्यौ॥ वेगवती सौ स्भौ भौ भ्भौ गः॥ भ
द्रविराट् त्जौ गौ म्सौ ज्गौ गः॥ केतुमती स्जौ स्भौ भ्रौ न्गौ गः॥ आख्या न
की तौ ज्गौ ग्त्तौ ज्गौ गः॥ विपरीताख्यानकी ज्तौ ज्गौ ग्तौ ज्गौ गः॥ ह
रिणप्लुता सौ स्लौ ग्न्भौ भ्रौ॥ अपरवक्त्रं नौ लौ ग्न्जौ ज्रौ॥ पुष्पिता
ग्रा नौ यौ न्जौ ज्रौ गः॥ १२॥ यवमती जौ जौ ज्रौ ज्रौ गुः॥ त्रि रवेकान्तत्रिं
शाद्देक त्रिंशाद् तेगः॥ खंजा महत्यसुजीति॥ १३॥ यतिर्विच्छेदः॥ तनु
मध्यात्यौ॥ कुमारललिता ज्सौ गः॥ माणवकाक्रीडितकं भ्तौ ल्गौ॥

चित्रपदा भौ गौ॥ विद्युन्माला मौ गौ॥ भुजगशिशुभृता नौ म्॥ हलमुखी
नौ स्॥ शुद्धविराण्मसौ ज्गौ॥ पणवो म्नौ य्गौ॥ रुक्मवती भ्मौ स्गौ॥ म
यूरसारिणी र्जौ र्गौ॥ मत्ता म्भौ स्गौ॥ उपस्थिता त्जौ ज्गौ॥ एकरूपं सौ ज्गौ
ग॥ इंद्रवज्रा तौ जौ ग॥ उपेंद्रवज्रा ज्तौ जौ ग्॥ वाद्यंतावुपजातयः॥
दोधकं भौ भौ ग॥ शालिनी म्तौ त्गौ गसमुद्रऋषयः॥१४॥ वातोर्मिम्
भौ तौ गच॥ भ्रमरविलसित म्भौ न्लौ ग॥ रथोद्धता नौ लौ ग॥ स्वा
गता नौ भ्गौ ग॥ वृत्ता नौ स्गौ ग॥ श्येनी जौ लौ ग॥ जगती॥ वंशस्था
ज्तौ ज्रौ ॥ इंद्रवंशा तौ ज्रौ॥ द्रुतविलंबितं न्भौ भ्रौ॥ तोटकं सः॥ पु
टो नौ म्यौ वसुसमुद्राः॥ जलोद्धतगति ज्सौ ज्सौ रसर्त्तवः॥ भुजं १२

गश्चयातंयः॥ स्रग्विणी रः॥ प्रमिताक्षरा स्जौ सौ॥ वैश्वदेवी मौ या विंद्रिय ऋषयः। नवमालि
नी न्जौ भ्यौ वितिः॥ १५॥ प्रहर्षिणी म्नौ ज्रौ गस्त्रिकदशाकौ। रुचिरा ज्भौ स्जौ गस्समुद्रनवकौ। म
त्तमयूरं म्तौ य्सौ गः। असंबाधा म्तौ न्सौ गौ विंद्रिय नवकौ। अपराजिता नौ सौ ल्गौ स्वर ऋ
षयः। प्रहरणकलिता नौ भ्नौ ल्गौ च। वसंततिलका त्भौ जौ गौ। सिंहोन्नता काश्यपस्य। उद्ध
र्षिणी सैतवस्य। चंद्रावर्त्ता नौ नौ स्। मालर्त्तुनवकौ चेत्। मणिगुणनिकरो वस्वृषयः। मालिनी नौ
म्यौ य्स्व। ऋषभगजविलसितं भ्रौ नौ न्गौ स्वरनवकौ। हरिणी न्सौ म्रौ स्लौ ग्रससमुद्रऋ
षयः। पृथ्वी ज्सौ ज्सौ य्लौ ग्वसुनवकौ। वंशपत्रपतितं भ्रौ न्भौ न्लौ ग्दिग्गृषयः। मंदाक्रां
ता म्भौ न्तौ त्गौ ग्समुद्रर्त्तुस्वराः। शिखरिणी य्मौ न्सौ भ्लौ ग्रुद्राः। कुसुमितलतावे
ल्लिता म्तौ न्यौ यौ विंद्रियर्त्तुस्वराः॥ १६॥ शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्यऋषयः।
सुवदना म्रौ भ्नौ य्भौ ल्गौ स्वरऋबिरसाः। ग्लितिवृत्तं। स्रग्धरा म्रौ भ्नौ यौ यू त्रिः सप्तकाः।
मद्रकं भ्रौ न्रौ न्रौ न्गौ दिगादित्याः। अश्वललितं न्जौ भ्जौ भ्जौ भ्लौ गुरुद्रादित्याः। मत्ता

श्री ड्गमौ ल्लौ नौ न्लौ ग्व सुपंचदशकौ। तन्वी भ्तौ न्सौ भौ न्यौ द्विरादित्याः॥ क्रौंच
पदाभ्मौ स्भौ नौ नोगष्टतेंद्रियवस्वृषयः। भुजंगविजृंभितं मौ ल्लौ नौ सौ ल्गौव
सुरुद्रऋषयः॥ अपवाहको म्नौ नौ नौ न्सौ गो नव क र्तुरसेंद्रियाणि॥ दंडको नौ
रः। प्रथम श्चंड वृष्टिप्रयातः। अन्यत्र रातमांड व्याघ्यां। शेषः प्रचित इति॥१७॥
अत्रानुक्तं गाथा। द्विकौ ल्लौ॥ मिश्रौ च। पृथग्ला मिश्राः। वसवस्त्रिकाः। ल
र्धे। सैकेग्। प्रतिलोमगुणं द्विर्लाघ्यं। ततो ग्येकं जह्यात्। द्विरर्धे। रूपेश्च न्यं। द्विः
श्च न्ये। तावदर्धे तद्गुणितं। द्विर्द्व्यूनं। तदंतानां। एकोनेद्धा। परेपूर्णं परेपूर्णमिति॥
॥१८॥ ॥ मयद्वादशाधीः पंचदशाछंदः षोळशपादः परो ह्लि क्षप्रस्तारपंक्तिर्विंशतिर्विं
शातिरेकविंशाति र्द्वैवतादितोष्टौ चतुः शतंषष्ठो विंशातिर्विंशातिर्युगपरांतिका त्रयोदशावृत्तंगा
वादौ विंशातिर्विंशातिर्यवमती त्रीणि यतिर्विंशातिर्वातोमश्मष्टादशाप्रहर्षिणी विंशातिः शार्दूलविक्रीडितं पंचद

शा भानुक्तं सप्तदशष्टादश॥ इति छंदः समाप्तः

॥ हरिः ॐ ॥ ॥ गौः। ग्मा। ज्मा। क्ष्मा। क्षा। क्षमा। क्षोणी। क्षितिः। अवनिः। उ
र्वी। पृथ्वी। मही। रिपः। अदितिः। इळा। निर्ऋतिः। भूः। भूमिः। पूषा। गा
तुः। गोत्रेत्येकविंशतिः पृथिवीनामधेयानि॥ १॥ हेम। चंद्रं। रुक्मं। अ
यः। हिरण्यं। पेशः। कृशनं। लोहं। कनकं। कांचनं। भर्म। अमृतं। मरु
त्। दत्रं। जातरूपमिति पंचदश हिरण्यनामानि॥ २॥ अंबरं। वियत्।
व्योम। बर्हिः। धन्व। अंतरिक्षं। आकाशं। आपः। पृथिवी। भूः। स्वयंभूः।
अध्वा। पुष्करं। सगरः। समुद्रः। अध्वरमिति षोडशांतरिक्षनामानि॥
॥ ३॥ स्वः। पृश्निः। नाकः। गौः। विष्टप्। नभ इति षट् साधारणानि।
॥ ४॥ खेदयः। किरणाः। गावः। रश्मयः। अभीशवः। दीधितयः। ग

भस्तयः । वनं । उस्राः । वसवः । मरीचिपाः । मयूखाः । सप्तऋषयः । सा
ध्याः । सुपर्णा इति पंचदश रश्मि नामानि ॥ ५ ॥ आताः । आशाः । उपराः ।
आष्ठाः । काष्ठाः । व्योम । ककुभः । हरित इत्यष्टौ दिङ् नामानि ॥ ६ ॥ श्या
वी । क्षपा । शर्वरी । अक्तुः । ऊर्म्या । राम्या । यम्या । नम्या । दोषा । नक्ता ।
तमः । रजः । असिक्नी । पयस्वती । तमस्वती । घृताची । शिरिणा । मोकी ।
शोकी । ऊधः । पयः । हिमा । वस्वी इति त्रयोविंशती रात्रि नामानि ॥ ७ ॥ वि
भावरी । सूनरी । भास्वती । ओदती । चित्रामघा । अर्जुनी । वाजिनी । वा ३४
जिनीवती । सुम्नावरी । अहना । द्योतना । श्वेत्या । अरुषी । सूनृता ।
सूनृतावती । सूनृतावरीति षोडशोषो नामानि ॥ ८ ॥ वस्तोः । द्युः ।

भानुः। वासरं। स्वसराणि। घ्रंसः। घर्मः। घृणः। दिनं। दिवा। दिवेदिवे।
द्यविद्यवि। तिद्वादशाहर्नामानि॥ ९॥ अद्रिः। ग्रावा। गोत्रः। वलः। अश्नः।
पुरुभोजाः। वलिशानः। अश्मा। पर्वतः। गिरिः। व्रजः। चरुः। वराहः। शं
बरः। रौहिणः। रैवतः। फलिगः। उपरः। उपलः। चमसः। अहिः। अभ्रं। बला
हकः। मेघः। दृतिः। ओदनः। वृषंधिः। वृत्रः। असुरः। कोशइतित्रिंशन्मेघ
नामानि॥ १०॥ श्लोकः। धारा। इळा। गौः। गौरी। गांधर्विः। गभीरा। गंभीरा।
मंद्रा। मंद्राजनी। वाशी। वाणी। वाणीची। वाणः। पविः। भारती। धमनिः।
नाळीः। मेळिः। मेना। सूर्या। सरस्वती। निवित्। स्वाहा। वग्नुः। उपब्दिः।
मायुः। काकुत्। जिह्वा। घोषः। स्वरः। शब्दः। स्वनः। ऋक्। होत्रा। गीः।

निघंट ३५ गाथा। गण। धेना। ग्नाः। विपा। नना। कशा। धिषणा। नौः। अक्ष
रं। मही। अदितिः। शची। वाक्। अनुष्टुप्। धेनुः। वल्गुः। गल्दा। स
रः। सुपर्णी। बेकुरेति सप्त पंचाशद्वाङ् नामानि॥ ११॥ अर्णः। क्षोदः।
क्षद्म। नभः। अंभः। कबंधं। सलिलं। वाः। वनं। घृतं। मधु। पुरीषं। पि
प्पलं। क्षीरं। विषं। रेतः। कशः। जन्म। वृबूकं। बुसं। तुग्र्या। बर्बुरं। सुक्षे
मं। धरुणं। सुरा। अररिंदानि। ध्वस्मन्वत्। जामि। आयुधानि। क्षपः।
अहिः। अक्षरं। स्रोतः। तृप्तिः। रसः। उदकं। पयः। सरः। भेषजं। सहः।
शवः। यहः। ओजः। सुखं। क्षत्रं। आवयाः। शुभं। यादुः। भूतं। भुव
नं। भविष्यत्। आपः। महत्। व्योम। यशः। महः। सर्णीकं। स्वृतीकं। ३५

सतीनं। गहनं। गम्भीरं। गंभरं। ईं। अन्नं। हविः। सद्म। सदनं। ऋतं। यो
निः। ऋतस्ययोनिः। सत्यं। नीरं। रयिः। सत्। पूर्णं। सर्वं। अक्षितं। बर्हिः।
नाम। सर्पिः। अपः। पवित्रं। अमृतं। इंदुः। हेम। स्वः। सर्गाः। शंबरं। अभ्वं।
वपुः। अंबु। तोयं। तूयं। कृपीटं। शुक्रं। तेजः। स्वधा। वारि। जलं। जलाषं।
इदमित्येकशतमुदकनामानि॥ १२॥ अवनयः। यव्याः। खाः। सीराः।
स्रोत्याः। एन्यः। धुनयः। रुजानाः। वक्षणाः। खादोअर्णाः। रोधचक्राः।
हरितः। सरितः। अग्रुवः। नभन्वः। वध्वः। हिरण्यवर्णाः। रोहितः। स
स्रुतः। अर्णाः। सिंधवः। कुल्याः। वर्यः। उर्व्यः। इरावत्यः। पार्व
त्यः। स्रवंत्यः। ऊर्जस्वत्यः। पयस्वत्यः। तरस्वत्यः। सरस्वत्यः।

हरस्वत्यः। रोधस्वत्यः। भास्वत्यः। अजिराः। मातरः। नद्य इति सप्तत्रिंश
न्नदीनामानि॥१३॥ अत्यः। हयः। अर्वा। वाजी। सप्तिः। वह्निः। दधिक्राः।

दधिक्रावा। एतग्वः। एतशाः। पैद्वः। दौर्गहः। औच्चैःश्रवसः। तार्क्ष्यः। आ
शुः। ब्रध्नः। अरुषः। मांश्चत्वः। अव्यथयः। श्येनासः। सुपर्णाः। पतंगाः।

नरः। ह्वार्याणां। हंसासः। अश्वा इति षड्विंशतिरश्वनामानि॥१४॥ ह
री इंद्रस्य। रोहितोग्नेः। हरित आदित्यस्य। रासभावश्विनोः। अजाः
पूष्णः। पृषत्यो मरुतां। अरुण्यो गाव उषसां। श्यावाः सवितुः। विश्व
रूपा बृहस्पतेः। नियुतो वायोरिति दश आदिष्टोपयोजनानि॥१५॥
भ्राजते। भ्राशति। भ्राश्यति। दीद्यति। शोचति। मंदते। भंदते।

रोचते। ज्योतते। द्योतते। द्युमत् इत्येकादश ज्वलतिकर्माणः॥१६॥ जमत्।
कल्मलीकिने। जंजणाभवन्। मल्मलाभवन्। अर्चिः। शोचिः। तपः।
तेजः। हरः। हृणिः। शृंगाणि शृंगाणी त्येकादश ज्वलतो नामधेयानि ना
मधेयानि॥१७॥ ॥ गौर्हेमां बरस्व ३ः रवेरय आताः श्यावी विभावरी
वस्तोरद्धिः श्लोकोर्णो वनयोत्योहरी इंद्रस्य भ्राजते जमदिति सप्तद
श॥ ॥ इति निघंटौ प्रथमोऽध्यायः॥ ॥ अपः। अप्नः। दंसः। वेषः। वे
पः। विष्ट्वी। व्रतं। कर्वरं। कुरुणं। शक्म। क्रतुः। करणानि। करांसि। क
रिक्रत्। करती। चक्रत्। कर्त्वं। कर्त्तोः। कर्त्तवे। कृत्वी। धीः। शची। श
मी। शिमी। शक्तिः। शिल्पमिति षड्विंशतिः कर्मनामानि॥१॥ तुक्।

निघंट॰ २ तोकं। तनयः। तोक्म। तक्म। शेषः। अप्नः। गयः। जाः। अपत्यं। यहुः।
सूनुः। नपात्। प्रजा। बीजमिति पंचदश अपत्यनामानि॥ २॥ मनुष्याः।
३७ नरः। धवाः। जंतवः। विशः। क्षितयः। कृष्टयः। चर्षणयः। नहुषः। हरयः।
मर्याः। मर्त्याः। मर्त्ताः। व्राताः। तुर्वशाः। द्रुह्यवः। आयवः। यदवः। अन
वः। पूरवः। जगतः। तस्थुषः। पंचजनाः। विवस्वंतः। पृतनाः इति पंचविं
शतिर्मनुष्यनामानि॥ ३॥ आयती। च्यवाना। अभीशू। अप्नवा
ना। विनंगृसौ। गभस्ती। करस्नौ। बाहू। भुरिजौ। क्षिपस्ती। शक्वरी। ३७
भरित्रे इति द्वादश बाहुनामानि॥ ४॥ अग्रुवः। अण्व्यः। क्षिपः।
विशः। शर्याः। रशनाः। धीतयः। अथर्यः। विपः। कक्ष्याः। अवनयः।

हरितः। स्वसारः। जामयः। सनाभयः। योक्त्राणि। योजनानि। धुरः। शा
खाः। अभीशवः। दीधितयः। गभस्तयइतिद्वाविंशतिरंगुलि नामानि॥
॥५॥ वश्मि। उश्मसि। वेति। वेनति। वेसति। वांछति। वष्टि। वनोति। जु
षते। हर्यति। आचके। उशिक्। मन्यते। छन्त्सत्। चाकनत्। चकमानः।
कनति। कानिषदित्यष्टादशकान्तिकर्माणः॥ ६॥ अंधः। वाजः। पयः।
श्रवः। पृक्षः। पितुः। सुतः। सिनं। अवः। क्षु। धासिः। इरा। इळा। इषं। ऊर्क्।
रसः। स्वधा। अर्कः। क्षद्म। नेमः। ससं। नमः। आयुः। सूनृता। ब्रह्म। व
र्चः। कीलालं। यशइत्यष्टाविंशतिरन्ननामानि॥ ७॥ आवयति।
भर्वति। बभस्ति। वेति। वेवेष्टि। अविष्यन्। बप्सति। भसथः। बब्धां।

निघंट.२ ह्वरतीति दशात्तिकर्मणः ॥ ८ ॥ ओजः । पाजः । शवः । तवः । तरः । त्वक्षः ।
शर्धः । बाधः । नृम्णं । तविषी । शुष्मं । शुष्णं । दक्षः । वीळु । च्योत्नं । शू
३८ षं । सहः । यहः । वधः । वर्गः । वृजनं । वृक् । मज्मना । पौंस्यानि । धर्णसिः ।
द्रविणं । स्यंद्रासः । शंबरमित्यष्टाविंशतिर्बलनामानि ॥ ९ ॥ मघं । रेक्णः ।
१४ रिक्थं । वेदः । वरिवः । श्वात्रं । रत्नं । रयिः । क्षत्रं । भगः । मीळ्हुं । गयः । द्यु
म्नं । इंद्रियं । वसु । रायः । राधः । भोजनं । तना । नृम्णं । बंधुः । मेधा । य
शः । ब्रह्म । द्रविणं । श्रवः । वृत्रं । ऋतमित्यष्टाविंशतिरेवधननामानि ॥ ३८
॥ १० ॥ अघ्न्या । उस्रा । उस्रिया । अही । मही । अदितिः । इळा । जगती ।
शक्वरीति नव गोनामानि ॥ ११ ॥ रेळते । हेळते । भामते । ह्रणीयते ।

भ्रीणाति। भ्रेषति। दोधति। वनुष्यति। कंपते। भोजत इति दश ॥ क्रुध्यति कर्मणः ॥ १२ ॥ हेळः। हरः। हृणिः। त्यजः। भामः। एहः। ह्वरः। तपुषी। जूर्णिः। मन्युः। व्यथिरित्येकादश क्रोधनामानि ॥ १३ ॥ वर्त्तते। अयते। लोटते। लोठते। स्यंदते। कसति। सर्पति। स्यमति। स्रवति। स्रंसते। अवति। श्चोतति। ध्वंसति। वेनति। मार्ष्टि। भुरण्यति। रावति। कालयति। पेलयति। कंटति। पिस्यति। विस्यति। मिस्यति। प्रवते। लवते। च्यवते। कवते। गवते। नवते। क्षोदति। नक्षति। सक्षति। म्यक्षति। सचति। ऋच्छति। तुरीयति। चतति। अतति। गाति। इयक्षति। सश्चति। त्सरति। रंहति। यतते। भ्रमति। ध्रजति। रजति। लजति। क्षियति। धमति। मि

नाति। ऋण्वति। ऋणोति। स्वरति। सिसर्त्ति। वेविष्टि। योविष्टि। रिणा
ति। रीयते। रजति। दध्यति। दभ्नोति। युध्यति। धन्वति। अरुषति।
आर्यति। ईयते। तकति। दीयति। ईषति। फणति। हनति। अर्दति।
मर्दति। सस्र्तते। नसते। हर्यति। इयर्त्ति। ईर्त्ते। ईंखते। ज्रयति। श्वात्रति।
गंति। आगन्। ईगंति। जंगंति। जिन्वति। जसति। गमति। ध्रति। ध्राति।
ध्रयति। वहते। रथर्यति। जेहते। ध्वः कति। स्तुंपति। प्साति। वाति। या
ति। इषति। द्राति। दूळति। एजति। जमति। जवति। वंचति। अनिति।
पवते। हंति। सेधति। आगन्। आजगन्। जिगाति। पतति। इन्वति। इ
मंति। द्रवति। वेति। हर्यतात्। एति। जगायात्। अयुथुरितिद्वाविंशंशतं

गतिकर्माणः॥ १४॥ नु। मक्षु। द्रवत्। ओषं। जीराः। जूर्णिः। शूर्त्ताः। शूघनासः।
शीभं। तृषु। तूयं। तूर्णिः। अजिरं। भुरण्युः। शु। आशु। प्राशुः। तूतुजिः। तू
तुजानः। तुज्यमानासः। अज्राः। साचीवित्। द्युगत्। ताजत्। तरणिः। वात
रंहा इति षड्विंशतिः क्षिप्रनामानि॥ १५॥ तळित्। आसात्। अंबरं। तुर्वशे।
अस्तमीके। आके। उपाके। अर्वाके। अंतमानां। अवमे। उपम इत्येका
दशांतिकनामानि॥ १६॥ रणः। विवाक्। विखादः। नदनुः। भरे। आक्रं
दे। आहवे। आजौ। पृतनाज्यं। अभीके। समीके। ममसत्यं। नेमधिता।
संकाः। समितिः। समननं। मीळ्हे। पृतनाः। स्पृधः। मृधः। पृत्सु। स
मत्सु। समर्ये। समरणे। समोहे। समिथे। संख्ये। संगे। संयुगे। संग

निघंट॰२ थे। संगमे। वृत्रतूर्ये। पृक्षे। आणौ। शूरसातौ। वाजसातौ। समनीके। ख
ले। खजे। पौंस्ये। महाधने। वाजे। अज्मे। सद्म। संयत्। संवत इति षट्च
२० त्वारिंशत्संग्राम नामानि॥ १७॥ इन्वति। नक्षति। आक्षाणः। आनट्। आ
४० पृ। आपानः। अशात्। नशात्। आनशे। अश्नुतइतिदशव्याप्तिकर्माणः॥
॥१८॥ दभ्नोति। श्नथति। ध्वरति। धूर्वति। वृणक्ति। वृश्चति। कृणवति। कृं
तति। श्वसिति। नभते। अर्दयति। स्तृणाति। स्नेहयति। यातयति। स्फु
रति। स्फुलति। निर्वपंतु। अवतिरति। वियातः। आतिरत्। तळित्। २०
आखंडल। दृणाति। रम्णाति। शृणाति। शाम्नाति। तृणेढि। ताढि।
नितोशते। निबर्हयति। मिनाति। मिनोति। धमतीतित्रयस्त्रिंशद्वधक

र्माणः॥१९॥ दिद्युत्। नेमिः। हेतिः। नमः। पविः। सृकः। वृकः। वधः। वज्रः।
अर्कः। कुत्सः। कुलिशः। तुंजः। तिग्मः। मेनिः। स्वधितिः। सायकः। परशु
रित्यष्टादश वज्रनामानि॥२०॥ इरज्यति। पत्यते। क्षयति। राजतीति च
त्वार ऐश्वर्यकर्माणः॥२१॥ राष्ट्री। अर्यः। नियुत्वान्। इनइनइति च त्वारी
श्वरनामानि॥२२॥ ॥अपस्तु अन्नं नुष्या आयत्य १ गुवो वरम्यंध आव
यत्योजो मघमघ्यारेळते हेळो वर्त्ते तेनु तळिद्दणाइन्वति दृश्नोति दिद्यु
दिरज्यति राष्ट्री द्वाविंशतिः॥ ॥इति निघंटौ द्वितीयोध्यायः॥ ॥उरु।
तुवि। पुरु। भूरि। शश्वत्। विश्वं। परीणसा। व्यानशिः। शतं। सहस्रं। स
लिलं। कुविदिति द्वादश बहुनामानि॥१॥ ऋहन्न। ह्रस्वः। निघृष्वः।

मायुकः। प्रतिष्ठा। कृधु। वम्रकः। दभ्रं। अर्भकः। क्षुल्लकः। अल्पइ्येकाद
शह्रस्वनामानि॥२॥ महत्। ब्रध्नः। ऋष्वः। बृहत्। उक्षितः। तवसः। तवि
षः। महिषः। अभ्वः। ऋभुक्षाः। उक्षा। विहायाः। यह्वः। ववक्षिथ। वि
वक्षसे। अंभृणः। माहिनः। गभीरः। ककुहः। रभसः। व्राधन्। विरप्शी।
अद्भुतं। बर्हिष्ठः। बर्हिषदिति पंचविंशतिर्महन्नामानि॥३॥ गयः। कृद
रः। गर्त्तः। हर्म्यं। अस्तं। पस्त्यं। दुरोणे। नीलं। दुर्याः। स्वसराणि। अमा।
दमे। कृत्तिः। योनिः। सद्म। शरणं। वरूथं। छर्दिः। छदिः। छाया। शर्म।
अज्मेति द्वाविंशतिर्गृहनामानि॥४॥ इरज्यति। विधेम। सपर्यति।
नमस्यति। दुवस्यति। ऋध्नोति। ऋणद्धि। ऋच्छति। सपति। विवास

तीतिदशापरिचरणाकर्मणः ॥५॥ शिंबाता । शतरा । शातपंता । शिल्गुः । स्यू
मकं । शेवृधं । मयः । सुग्म्यं । सुदिनं । शूषं । शुनं । शग्मं । भेषजं । जलाषं । स्यो
नं । सुम्नं । शेवं । शिवं । शं । कमितिविंशतिः सुखनामानि ॥६॥ निर्णिक् ।
वव्रिः । वर्पः । वपुः । अमतिः । अप्सः । प्सु । अप्नः । पिशं । पेशः । कृशनं । म
रुत् । अर्जुनं । ताम्रं । अरुषं । शिल्पमितिषोडशरूपनामानि ॥७॥
अस्रेमा । अनेमा । अनेद्यः । अनवद्यः । अनभिशस्त्यः । उक्थ्यः ।
सुनीथः । पाकः । वामः । वयुनमितिदशप्रशस्यनामानि ॥८॥ केतुः । के
तः । चेतः । चित्तं । क्रतुः । असुः । धीः । शची । माया । वयुनं । अभिख्ये
त्येकादशप्रज्ञानामानि ॥९॥ बट् । श्रत् । सत्रा । अद्धा । इत्था । ऋत

निघंट॰२ मितिषट् सत्यनामानि॥१०॥ चिकयत्। चाकनत्। अचक्षम। चष्टे। विचष्टे।
२२ विचर्षणिः। विश्वचर्षणिः। अवचाकशदित्यष्टौ पश्यतिकर्माणः॥११॥
हिकं। नुकं। सुकं। आहिकं। आकीं। नकिः। माकिः। नकीं। आकृतमितिनवो
22 त्तराणिपदानिसर्वपदसमाम्नानाय॥१२॥ इदमिव। इदंयथा। अग्निर्न
ये। चतुरश्चिद्ददमानात्। ब्राह्मणाव्रतचारिणः। वृक्षस्यनुतेपुरुहूतवयाः।
जारआभगं। मेषोभूतो३ भियन्नयः। तद्रूपः। तद्वर्णः। तद्वत्। तथेत्यु
पमाः॥१३॥ अर्चति। गायति। रेभति। स्तोभति। गूर्धयति। गृणाति।
जरते। ह्वयते। नदति। पृच्छति। रिहति। धमति। कृपायति। कृपण्यति। प २२
नस्यति। पनायते। वल्गूयति। मंदते। भंदते। छंदति। छदयते। शशा

मानः। रंजयति। रजयति। शंसति। स्तौति। यौति। रौति। नौति। भनति। प
णायति। पणते। सपति। पप्रक्षाः। महयति। वाजयति। पूजयति। मन्यते।
मदति। रसति। स्वरति। वेनति। मंद्रयते। जल्पतीति चतुश्चत्वारिंशदर्चति
कर्मणि॥१४॥ विप्रः। विग्रः। गृत्सः। धीरः। वेनः। वेधाः। कण्वः। ऋभुः। न
वेदाः। कविः। मनीषी। मंधाता। विधाता। विपः। मनश्चित्। विपश्चित्।
विपन्यवः। आकेनिपः। उशिजः। कीस्तासः। अद्धातयः। मतयः। मतुथाः।
वाघत इति चतुर्विंशतिर्मेधाविनामानि॥१५॥ रेभः। जरिता। कारुः। नदः।
स्तामुः। कीरिः। गौः। सूरिः। नादः। छंदः। स्तुप्। रुद्रः। कृपण्युरिति त्रयो
दश स्तोतृनामानि॥१६॥ यज्ञः। वेनः। अध्वरः। मेधः। विदथः। नार्यः।

निघंट ३ सवनं। होत्रा। इष्टिः। देवताता। मखः। विष्णुः। इंदुः। प्रजापतिः। घर्मइतिपंचदश
२२ यज्ञनामानि॥१७॥ भरताः। कुरवः। वाघतः। वृक्तबर्हिषः। यतस्रुचः।
मरुतः। सबाधः। देवयवइत्यष्टादृत्विङ्नामानि॥१८॥ ईमहे। यामि। म
43 न्महे। दद्धि। शग्धि। पूर्धि। मिमिड्ढि। मिमीहि। रिरिड्ढि। रिरीहि। पीपर
त। यंतारः। यंधि। इषुध्यति। मदेमहि। मनामहे। मायतइतिसप्तदश
याञ्चाकर्मणः॥१९॥ दाति। दाशति। दासति। राति। रासति। पृण
क्षि। पृणाति। शिक्षति। तुंजति। मंहतइतिदशदानकर्मणः॥२०॥ परि २३
स्रव। पवस्व। अभ्यर्ष। आशिषइतिचत्वारोध्येषणाकर्मणः॥२१॥
स्वपिति। सस्तीतिद्वौस्वपितिकर्मणौ॥२२॥ कूपः। कातुः। कर्तः। वव्रः।

काटः। खातः। अवतः। क्रिविः। सूदः। उत्सः। ऋश्यदात्। कारोतरात्। कुश
यः। केवट इति चतुर्दश कूपनामानि॥२३॥ तृपुः। तक्वा। रिह्वा। रिपुः। रिक्वा।
रिहायाः। तायुः। तस्करः। वनर्गुः। हुरश्चित्। मुषीवान्। मलिम्लुचः। अ
घशंसः। वृक इति चतुर्दशैव स्तेननामानि॥२४॥ निण्यं। सस्वः। सनु
तः। हिरुक्। प्रतीच्यं। अपीच्यमिति षण्निणः तांतर्हित नामधेयानि।
॥२५॥ आके। पराके। पराचैः। आरे। परावत इति पंच दूरनामानि॥२६॥
पूर्व्यं। प्रत्नं। प्रदिवः। प्रवयाः। सनेमि। अह्नाय इति षट् पुराणनामानि॥२७॥
नवं। नूत्नं। नूतनं। नव्यं। इदा। इदानीमिति षळेव नवनामानि॥२८॥
प्रपित्वे। अभीके। दभ्रं। अर्भकं। तिरः। सतः। त्वः। नेमः। ऋक्षाः। स्तृ

भिः। वम्रीभिः। उपजिह्विका। ऊर्दरं। कृदरं। रंभः। पिनाकं। मेना। ग्नाः।
शेपः। वैतसः। अया। एना। सिषक्तु। सचते। भ्यसते। रेजत इति षड्विंश
तिर्द्विशा उत्तराणि नामानि॥ २९॥ स्वधे। पुरंधी॥ धिषणे। रोदसी। क्षोणी॥
अंभसी। नभसी। रजसी। सदसी। सद्मनी। घृतवती। बहुले। गभीरे।
गंभीरे। ओण्यौ। चम्वौ। पार्श्वौ। मही। उर्वी। पृथ्वी। अदिती। अही। दू
रे अंते। अपारे अपारे इति चतुर्विंशतिर्द्यावापृथिव्यो नामधेयानि॥ ३०॥
॥ ॥ उर्वी १६ न्मह ऊय इरज्याति त्रीं बाता निर्णिग स्त्रेमा केतुर्बद्रू चिक्य २४
ङ्कि कं मिद मिवार्च तिवि प्रो रेभो यज्ञो भरुता ईमहे दाति परिस्रव
स्वपिति कूप स्तृपु निण्यमाके प्रत्नं नवं प्रपित्वे स्वधे त्रिंशत्॥ ॥ इति नि

घं इति तृतीयोध्यायः॥ ॥जहा। निधा। शितामा। मेहना। दमूनाः। मूषः। दूवि
रेण। कुरुतन। जठरे। तितउ। शिप्रे। मध्या। मंदू। ईर्मांतासः। कायमानः। लो
धं। नूीरं। विद्रधे। द्रुपदे। तुग्वनि। नंसंते। नसंतः। आहनसः। अप्रसत्।
हूष्मिणः। वाहः। परितक्म्या। सुविते। दयते। नूचित्। नूच। दावने। अकूपा
रस्य। शिशीते। सुतुकः। सुप्रायणाः। अप्रायुवः। च्यवनः। रजः। हरः। जु
हुरे। व्यंतः। काणाः। वाशी। विषुणः। जामिः। पिता। शंयोः। अदितिः। एरि
रे। जसुरिः। जरते। मंदिने। गोः। गातुः। दंसयः। तूताव। चयसे। वियुते।
ऋधक्। अस्याः। अस्येति द्विषष्टिः पदानि॥ ३॥ सस्निं। वाहिष्ठः। दू
तः। वावशानः। वार्यं। अंधः। असश्चंती। वनुष्यति। तरुष्यति। भंदनाः।

निघंट॰ ४ आहनः। नदः। सोमो अक्षाः। श्वात्रं। ऊतिः। हासमाने। पड्भिः। ससं। द्विता। व्राः।
२५ वराहः। स्वसराणि। शर्याः। अर्कः। पविः। वक्षः। धन्व। सिनं। इत्था। सचा।
चित्। आ। द्युम्नं। पवित्रं। तोदः। स्वंचाः। विष्णुः। आघृणिः। पृथुज्रयाः। अ शिपिविष्टः।
25 थर्युं। काणुका। अध्रिगुः। आङ्गूषः। आपान्तमन्युः। श्मशा। उर्वशी। वयु
नं। वाजपस्त्यं। वाजगंध्यं। गध्यं। गधिता। कौरयाणः। तौरयाणः। अ
ह्रयाणः। हरयाणः। आरितः। व्रंदी। निष्षपी। तूर्णाशं। क्षुंपं। निचुंपुणः।
पदिं। पादुः। वृकः। जोषवाकं। कृत्तिः। श्वघ्नी। समस्य। कुटस्य। चर्षणिः।
शंबः। केपयः। तूतुमाकृषे। अंसत्रं। काकुदं। बीरिटं। अच्छ। परि। ईं। २५
सीं। एनं। एनां। सृणिरिति चतुरुत्तरमशीतिः पदानि॥२॥ आशुशु

क्षणिः। आत्राक्ष्यः। काद्रिः। कुणारुं। अलातृणः। सलल्लूकं। कत्पयं।
विस्रुहः। वीरुधः। नक्षद्दाभं। अस्तृधोयुः। निश्चंभाः। बृबदुक्थं। ऋदूद
रः। ऋदूपे। पुलुकामः। असिन्वती। कृपना। भाऋजीकः। रुजानाः। जू
र्णिः। ओमना। उपलप्रक्षिणी। उपसि। प्रकलवित्। अभ्यर्धयज्वा। ईक्षे।
क्षोणस्य। असमे। पाथः। सवीमनि। सप्रथाः। विदथानि। आयंतः। आ
त्रीः। अजीगः। अमूरः। शाशमानः। देवोदेवाच्या। कृपा। विजामातुः। ओ
मासः। सोमानं। अनवायं। किमीदिने। अमवान्। अमीवा। दुरितं। अघा।
अमतिः। श्रुष्टी। पुरंधिः। रुशात्। रिशादसः। सुदत्रः। सुविदत्रः। आनुष
क्। तुर्वणिः। गिर्वणसे। असूर्ते सूर्ते। अम्यक्। यादृश्मिन्। जारयायि।

निघंट. ४ अग्रिया। चनः। पचता। शुरुधः। अमिनः। जस्यती। अप्रतिष्कुतः। शाशदा
नः। सूप्रः। सुशिप्रः। शिप्रे। रंसु। द्विबर्हाः। अक्रः। उराणः। स्तियानां। स्तिपाः।
२६ जबारु। जरूथं। कुलिशः। तुंजः। बर्हणा। ततनुष्टिं। इलीबिशः। कियेधाः।
26 भृमिः। विष्पितः। तुरीपं। रास्पिनः। ऋंजतिः। ऋजुनीती। प्रतद्वसू। हि
नोत। चोष्कूयमाणः। चोष्कूयते। सुमत्। दिविष्टिषु। दूतः। जिन्वति। अ
मत्रः। ऋचीषमः। अनर्शरातिं। अनर्वा। असामि। गल्दया। जल्ह
वः। बकुरः। बेकनाटान्। अभिधेतन। अंहुरः। बतः। वाताप्यं। चाकन्। २६
रथर्यति। असक्रां। आधवः। अनवब्रवः। सदान्वे। शिरिंबिठः। परा
शरः। क्रिविर्दती। करूळती। दनः। शारारुः। इदंयुः। कीकटेषु। बुंदः। वृं

दं। किः। उल्बं। ऋबीसम्। बीसमितित्रयस्त्रिंशच्छतंपदानि॥ ३॥ ॥ ज
हासस्निमाशुशुक्षणिस्त्रीणि॥ ॥ इतिनिघंटौचतुर्थोध्यायः॥ ॥ अग्निः।
जातवेदाः। वैश्वानरइतित्रीणिपदानि॥ १॥ द्रविणोदाः। इध्मः। तनूनपा
त्। नराशंसः। इळः। बर्हिः। द्वारः। उषासानक्ता। दैव्याहोतारा। तिस्रोदे
वीः। त्वष्टा। वनस्पतिः। स्वाहाकृतयइतित्रयोदशपदानि॥ २॥ अश्वः।
शकुनिः। मंडूकाः। अक्षाः। ग्रावाणः। नराशंसः। रथः। दुंदुभिः। इषुधिः।
हस्तघ्नः। अभीशवः। धनुः। ज्या। इषुः। अश्वाजनी। उलूखलं। वृषभः।
द्रुघणः। पितुः। नद्यः। आपः। ओषधयः। रात्रिः। अरण्यानी। श्रद्धा।
पृथिवी। अप्वा। अग्नायी। उलूखलमुसले। हविर्धाने। द्यावापृथिवी।

विपाट् छुतुद्री । आर्त्नी । शुनासीरौ । देवी जोष्ट्री । देवी ऊर्जाहुती तिषट्त्रिं
शत्पदानि ॥ ३ ॥ वायुः । वरुणः । रुद्रः । इंद्रः । पर्जन्यः । बृहस्पतिः । ब्रह्मणस्प
स्पतिः । क्षेत्रस्यपतिः । वास्तोष्पतिः । वाचस्पतिः । अपांनपात् । यमः ।
मित्रः । कः । सरस्वान् । विश्वकर्मा । तार्क्ष्यः । मन्युः । दधिक्राः । सविता । त्वष्टा ।
वातः । अग्निः । वेनः । असुनीतिः । ऋतः । इंदुः । प्रजापतिः । अहिः । अ
हिर्बुध्न्यः । सुपर्णः । पुरूरवा इति द्वात्रिंशत्पदानि ॥ ४ ॥ श्येनः । सोमः ।
चंद्रमाः । मृत्युः । विश्वानरः । धाता । विधाता । मरुतः । रुद्राः । ऋभवः । अं
गिरसः । पितरः । अथर्वाणः । भृगवः । आप्त्याः । अदितिः । सरमा । स
रस्वती । वाक् । अनुमतिः । राका । सिनीवाली । कुहूः । यमी । उर्वशी । पृ

थिवी। इंद्राणी। गौरी। गौः। धेनुः। अघ्न्या। पथ्या। स्वस्तिः। उषाः। इळा। रोद
सी तिषट्त्रिंशत्पदानि॥ ५॥ अश्विनौ। उषाः। सूर्या। वृषाकपायी। सरण्यूः।
त्वष्टा। सविता। भगः। सूर्यः। पूषा। विष्णुः। विश्वानरः। वरुणः। केशी। केशि
नः। वृषाकपिः। यमः। अज एकपात्। पृथिवी। समुद्रः। अथर्वा। दध्यङ्। मनुः।
आदित्याः। सप्त ऋषयः। देवाः। विश्वेदेवाः। साध्याः। वसवः। वाजिनः। देव
पत्न्यो देवपत्न्य इत्येकत्रिंशत्पदानि॥ ६॥ ॥ अग्निर्द्रविणोदा अश्वो वा
युः श्येनोश्विनोषट्॥ ॥ इति निघंटौ पंचमोध्यायः॥ ॥ विसर्गबिंदुमा
त्राणि पदपादाक्षराणि च॥ न्यूनानि चातिरिक्तानि क्षमस्व परमेश्व
र॥ १॥ ॥ श्रीराम जय राम जय जय राम॥ ॥ श्रीरस्तु॥ ॥

शि॰ च॰

२८

॥इति शिक्षा चतुष्टयं समाप्तं॥

२८